सुरेन्द्रजित्, पुं, (सुरेन्द्रं देवराजं जितवानिति। जि+क्विप्। तुगागमश्च।) गरुड़ः। इति हलायुधः॥ इन्द्रजिच्च॥
सुरेभं, क्ली, (सु+रेभ+अच्।) रङ्गम्। इति त्रिकाण्डशेषः॥
सुरेवटः, पुं, रामपूगः। इति त्रिकाण्डशेषः॥
सुरेश्वरः, पुं, (सुराणामीश्वरः।) रुद्रः। इति जटाधरः॥ (यथा, मात्स्ये। ५। २८—३०।
"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः।
एते रुद्राः समाख्याता एकादश गणेश्वराः॥"
इन्द्रः। यथा, रघुः। ३। ६४।
"नरेन्द्रसूनुः प्रतिसंहरन्निषुं
प्रियंवदः प्रत्यवदत् सुरेश्वरम्॥"
देवश्रेष्ठे, त्रि। यथा, भागवते। ४। १५। ८।
"ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः।
वैण्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः।
पादयोररविन्दञ्च तं वै मेने हरेः कलाम्॥"
सुरेश्वराचार्य्यः। यथा, पञ्चदशी। ६। १८०।
"अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव।
ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः॥")
सुरेश्वरी, स्त्री, (सुराणामीश्वरी।) स्वर्गगङ्गा। इति शब्दरत्नावली॥ दुर्गा च॥
सुरेष्टः, पुं, (सुराणामिष्टः।) शिवमल्ली। शालः। सुरपुन्नागः। इति राजनिर्घण्टः॥
सुरेष्टा, स्त्री, (सुराणामिष्टा।) ब्राह्मी। इति राजनिर्घण्टः॥
सुरोत्तमः, पुं, (सुरेषु उत्तमः।) सूर्य्यः। इति केचित्॥ देवश्रेष्ठश्च॥ (यथा, महाभारते। ३। ५६। ७।
"विप्रियं ह्याचरन् मर्त्त्यो देवानां मृत्युमृच्छति
त्राहि मामनवद्याङ्गि! वरयस्व सुरोत्तमान्॥")
सुरोत्तरः, पुं, (सुरेषु तत्पूजनेषु उत्तरः श्रेष्ठः।) चन्दनम्। इति शब्दचन्द्रिका॥
सुरोदः, पुं, (सुरा उदकं यस्य। उत्तरपदस्योदकस्योदादेशः।) सुरासमुद्रः। इति जटाधरः॥ (यथा, भागवते। ५। १। ३३।
"क्षारोदेक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्त जलधयः॥")
सुलक्षणा, स्त्री, (सुशोभनं लक्षणं यस्याः।) उमासखीविशेषः। इति शब्दमाला॥ सुन्दरलक्षणयुक्ते, त्रि॥ (यथा, कथासरित्सागरे। १५। ६८।
"तच्छ्रुत्वा व्यसृजत् राजा सोऽथ प्रत्ययितान्
द्विजान्।
गत्वा सुलक्षणा सा वा न वेत्यालोच्यतामिति॥"
सुलभः, त्रि, सुखेन लभ्यते इति। सु+लभ+खल्। "न सुदुर्भ्यां केवलाभ्याम्।" ७। १। ६८। इति नुमागमो न।) सुखलभ्यः। अनायासप्राप्यः। यथा, आह्निकतत्त्वे।
"सुलभं सकलं पुण्यं यज्ञदानादिजं फलम्।
गङ्गातोयैश्च सतिलैर्दुर्लभं पितृतर्पणम्॥"
सुलभा, स्त्री, (सुखेन लभ्यते इति। लभ+खल्। टाप्।) माषपर्णी। धूम्रपत्रा। इति राजनिर्घण्टः॥
सुलोचनः, पुं, (शोभने लोचने यस्य।) हरिणः। इति राजनिर्घण्टः॥ दुर्य्योधनः। इति केचित्॥ (धृतराष्ट्रपुत्त्राणामन्यतमः। यथा, महाभारते १। ६७। ९४।
"विविंशतिर्विकर्णश्च जलसन्धः सुलोचनः॥")
सुन्दरचक्षुर्युक्ते, त्रि॥ (यथा, महाभारते। ३। ५५। १३।
"अतीवसुकुमाराङ्गीं तनुमध्यां सुलोचनाम्।
आक्षिपन्तीमिव च भाः शशिनः स्वेन तेजसा॥"
सुलोचना, स्त्री, (शोभने लोचने यस्याः।) माधवराजपत्नी। यथा,—
माधव उवाच।
"श्रीमद्विक्रमभूभर्त्तुः पुत्त्रोऽहं माधवाह्वयः।
सर्व्वभावैर्भविष्यामि वशगस्तव सुन्दरि!॥
चन्द्रकलोवाच
समुद्रपारे तरुणपुरन्दरपुरोपमा।
प्लक्षद्वीपेऽस्ति विख्याता दीव्यन्ती संज्ञया
पुरी॥
गुणाकराह्वयस्तत्र राजा श्रेष्ठो महायशाः।
सुशीला नाम तद्भार्य्या सर्व्वलक्षणसंयुता॥
सुलोचनाह्वया कन्या वीर तत्कुक्षिसम्भवा।
गृहाण तां विवाहेन स्वर्गभोगं यदीच्छसि॥"
इत्युपक्रम्य।
"ततः शुभे क्षणे तस्मिन् पृष्ठमारुह्य वाजिनः।
प्रचेष्टाख्येन भृत्येन विलङ्घ्य जलधिं ययौ॥
ततो गन्धर्व्वविधिना स राजतनयः सुधीः।
चक्रे विवाहं तां कन्यां तत्रैव प्राप्तकौतुकः॥"
इति पाद्मे क्रियायोगसारे ५ अध्यायः॥
सुलोमशा, स्त्री, (शोभना लोमशा।) काकजङ्घा। इति राजनिर्घण्टः॥ शोभनलोमयुते, त्रि॥
सुलोमा, स्त्री, (सुष्ठु लोमान्यस्याः। डाप्।) ताम्रवल्ली। मांसच्छदा। इति राजनिर्घण्टः॥
सुलोहकं, क्ली, (सुष्ठु लोहमिव। कन्।) पित्तलम्। इति हेमचन्द्रः॥
सुलोहिता, स्त्री, (सुष्ठु लोहिता।) अग्निजिह्वाविशेषः। इति शब्दमाला॥ (यथा, मुण्डकोपनिषदि। १। २। ४।
"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरूपी च देवी
लोलायमाना इति सप्त जिह्वाः॥"
सुन्दररक्तवर्णे, पुं॥ तद्वति, त्रि॥
सुवक्त्रः, पुं, (सुष्ठु वक्त्रं यस्मात्।) वनबर्व्वरी। इति राजनिर्घण्टः॥ सुन्दरानने, त्रि॥ (यथा, महाभारते। १४। ८। १६।
"उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे॥")
सुवचनं, क्ली, (सुष्ठु वचनम्॥) शोभनोक्तिः। तत्पर्य्यायः। सुप्रलापः २। इत्यमरः। १। ६। १७॥ (यथा, उत्तरचरिते। १ अङ्के।
"म्लानस्य जीवकुसुमस्य विकाशनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि॥")
सुवचनी, स्त्री, (सुष्ठु वचनं यस्याः। टित्त्वात् ङीप्। एतदाराधनया आराधयितुर्वाक्यसाफल्यात्तथात्वम्।) देवीविशेषः। विपदि स्त्रियो यस्याः पूजां मन्वतं कुर्व्वन्ति च। आचारमार्त्तण्डे शुभसूचनीति वर्त्तते॥
सुवचाः, [स्] त्रि, (सुष्ठु वचो यस्य।) वाग्मी। इति जटाधरः॥
सुवनः, पुं, (सूते विश्वमिति। सू+"भूसूधूभ्रस्जिभ्यश्छन्दसि।" उणा० २। ८०। इति क्युन्।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥ चन्द्रः। इति केचित्॥
सुवर्चकः, पुं, स्वर्जिकाक्षारः। इति जटाधरः॥
सुवर्चला, स्त्री, सूर्य्यपत्नी। इति त्रिकाण्डशेषः॥ अतसी। इति रत्नमाला॥ सूर्य्यमुखीपुष्पम्। इति केचित्। आदित्यभक्ता। (अस्याः पर्य्यायो गुणाश्च यथा,—
"सुवर्चला सूर्य्यभक्ता वरदावदरापि च।
सूर्य्यावर्त्ता रविप्रीतापरा ब्रह्मसुदुर्लभा॥
सुवर्चला हिमा रूक्षा स्वादुपाका सरा गुरुः।
अपित्तला कटुः क्षारा विष्टम्भकफवातजित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
ब्राह्मी। इति राजनिर्घण्टः॥ देशविशेषे, पुं॥
सुवर्चाः, [स्] त्रि, शोभनतेजोविशिष्टः। शोभनं वर्च्चो यस्येति बहुव्रीहिसमासनिष्पन्नः॥ (यथा, महाभारते। ३। ५३। ७।
"तं स भीमः प्रजाकामस्तोषयामास धर्म्मवित्
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम्॥"*
पुं, धृतराष्ट्रपुत्त्रविशेषः। १। ६७। १०१।
"दृढ़हस्तः सुहस्तश्च वातवेगसुवर्च्चसौ॥")
सुवर्च्चिकः, पुं, स्वर्जिकाक्षारः। इति राजनिर्घण्टः॥ (यथा,—
"कथितः स्वर्जिकाभेदो विशेषज्ञैः सुवर्च्चिकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सुवर्च्चिका, स्त्री, जतुका। इति राजनिर्घण्टः॥ (स्वर्जिकाक्षारः। अस्याः पर्य्यायो यथा,—
"कापोतं स्वर्जिका स्वर्जिः स्वर्ज्जका च सुवर्च्चिका॥"
इति वैद्यकरत्नमालायाम्॥
तथास्या गुणाः।
"सुवर्च्चिका स्वर्जिकावत् बोद्धव्या गुणतो जनैः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सुवर्च्ची, [न्] पुं, स्वर्जिकाक्षारः इति राजनिर्घण्टः॥
सुवर्णं, क्ली, (शोभनो वर्णो यस्य।) धातुविशेषः। सोना इति भाषा। तत्पर्य्यायः। स्वर्णम् २ कनकम् ३ हिरण्यम् ४ हेम ५ हाटकम् ६ तपनीयम् ७ शातकुम्भम् ८ गाङ्गेयम् ९ भर्म्म १० कर्व्वुरम् ११ चामीकरम् १२ जातरूपम् १३